MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# The Concept of *Vidhi* in the Light of *Siddhāntaleśasaṃgraha* and the Doctrinal Divergence Between *Bhāmatī* and *Vivaraṇa*: A Critical Study

## सिद्धान्तलेशसंग्रहरीत्या विधिविचारः तथा विधिविचारे भामती-विवरणयोः मतभेदविमर्शः

***Amit Ghosal***

*Research Scholar, Dept. of Advaita-Vedanta*
*National Sanskrit University, Tirupati, pin-517507*
*Email-amitghosal585@gmail.com*
*Page No: 92-98*

***Abstract:*** *Among the six orthodox (Āstika) schools of Indian philosophy, Mīmāṃsā is distinctly celebrated as the critical system of hermeneutical inquiry. Derived from the root mān (**मान्**), the term Mīmāṃsā signifies a revered or systematic deliberation (pūjita-vicāra). Within this methodology of rigorous analysis, the concept of injunctive statement (vidhi) serves as a foundational instrument. The operation of vidhi is prominently evident across both branches: Pūrva-mīmāṃsā and Uttara-mīmāṃsā (Vedānta).*

*In Uttara-mīmāṃsā, or the inquiry into Brahman, the functional application of vidhi is notably deliberated upon in the classical scriptural injunction of the Maitreyī-Brāhmaṇa from the Bṛhadāraṇyakopaniṣad: "The Self, my dear, should indeed be realized; it ought to be heard, reflected upon, and meditated upon" (ātmā vā are draṣṭavyaḥ śrotavyo mantavyo nididhyāsitavyaḥ, 2.4.5). The critical issue of inquiry centers on how hearing (śravaṇa), contemplation (manana), and meditation (nididhyāsana) are to be undertaken, and specifically, whether an operative injunction (vidhi) applies to these contemplative steps.*

*On this hermeneutical dilemma, notable divergence of views exists among various preceptors within Advaita Vedānta, as meticulously cataloged in the Siddhāntaleśasaṃgraha of Ācārya Appayya Dīkṣita. A pronounced divergence emerges between the Bhāmatī and Vivaraṇa traditions. While the Vivaraṇa school advocates that the scriptural injunction regarding śravaṇa and related practices constitutes a restrictive injunction (niyama-vidhi), proponents of the Bhāmatī school reject the applicability of any formal injunction whatsoever to these contemplative processes. This study presents a concise, critical evaluation of this debate.*

***Keywords:*** *Niyama-vidhi, Parisaṅkhyā-vidhi, Apūrva-vidhi, Bhāmatī-prasthāna, Vivaraṇa Tradition.*

### उपोद्घातः

'अपौरुषेयं वाक्यं वेद'[1] इति लक्ष्यनिर्देशः। रामायणमहाभारतादिवाक्येषु अतिव्याप्तिवारणाय अपौरुषेयमिति विशेषणदलं प्रयुक्तमस्ति। अपि च नित्ये आत्मादौ अतिव्याप्तिवारणाय वाक्यमिति। प्रमाणान्तरेणार्थमुपलभ्य निर्मितत्वं पौरुषेयत्वम्। तद्भिन्नवाक्यत्वम् अपौरुषेयत्वमिति फलति। स च वेदो विधिमन्त्रनामधेयनिषेधार्थवादात्मकः[2]। अत्र च अपौरुषेयस्य वेदस्य पञ्चमुख्यप्रभेदेषु आदिमो भागः खलु विधिः।

विधेः सामान्यलक्षणं खलु— प्रयोजनवदर्थविधानेनार्थवान्। तदुक्तं- 'तत्राज्ञातार्थज्ञापको वेदभागो विधिः'[3]। अज्ञातस्य प्रयोजनवतोऽर्थस्य यागादिरूपस्य ज्ञापकः वेदभागः इत्यर्थः। अर्थात् योऽर्थः प्रत्यक्षादिप्रमाणान्तरेण अज्ञातः तादृशमर्थं विधत्ते। तेन अज्ञातप्रयोजनवदर्थविधानेन अर्थवान् विधिरिति योजना। अस्य च विधिशब्दस्य व्युत्पत्तिः- विधत्ते इति विधिः इत्यनेन वि-इत्युपसर्गपूर्वकं धा-धातोः कि-प्रत्ययेन पुंलिङ्गे विधिशब्दोऽयं निष्पद्यते। स च विधि अप्राप्तम् अर्थं विधत्ते। तदुच्यते- अत्र मानान्तरप्राप्तत्वं मानान्तरज्ञाततत्वम्। अप्राप्तत्वञ्चाज्ञातत्वमिति बोध्यमिति[4]।

अस्य च विधेः उदाहरणाणुगुणं समन्वयः प्रदर्श्यते— 'अग्निहोत्रं जूहूयात्स्वर्गकामः' इति अधिकारविधिः। अग्निहोत्रहोमः स्वर्गसाधनमिति विधिना बोध्यते। तत्र प्रमाणन्तरेण अज्ञातं स्वर्गरूपप्रयोजनविशिष्टं होमं विदधाति अयं विधिः।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

अयमग्निहोत्रहोमः स्वर्गसाधनमिति वेदवाक्यभिन्नेन न केनापि प्रमाणेन बोध्यते। अतः अयं विधिलक्षणलक्षितः।

अस्य च विधेः संख्याविषये शास्त्रकारेषु पण्डितवर्गेषु नैके मतभेदाः विलसन्ति। तत्र मीमांसान्यायप्रकाशे आचार्यापदेवः अपूर्वविधिः-गुणविधिः-विशिष्टविधिश्चेति विधित्रयमादौ विचार्यते। तत्र भवता मीमांसान्यायप्रकाशकारेण आपदेवाचार्येण–

इतोऽपि उत्पत्ति-अधिकार-नियम-परिसङ्ख्यादिभेदेन नैके भेदाः सन्ति। अतः विधयः अनन्ताः इति निश्चप्रचं वक्तुं शक्यते। तदुक्तं आचार्याप्पयदीक्षितेण स्वकीये विधिरसायणे—

"अज्ञातज्ञापकश्शब्दो विधिरित्यभिधीयते।
अपूर्वो नियमश्चेति परिसङ्ख्येति सा त्रिधा।।
क्रत्वर्थ पुरुषार्थश्च निषेधो विधिरेव च।
दृष्टार्थश्चाप्यदृष्टार्थः स प्रत्येकं द्विधा।।
अनन्ताः विधयः तस्मान्न तेषां लक्षणं कृतम्।।"

सत्स्वपि अनेकविधिभागेषु पण्डितचक्रचूडामणिना नानाशास्त्रग्रन्थनिर्मात्रा तत्र भवता श्रीमता अप्पयदीक्षितेन्द्रपादेन स्वकीये विधिरसायणे विधित्रयमेव प्रत्यपादि। ते विधयः खलु—

"अपूर्वो नियमश्चेति परिसङ्ख्येति सा त्रिधा।"

आचार्यकुमारिलभट्टपादेनाऽपि विधिः त्रिधा विभक्तः। अपूर्वविधिः-नियमविधिः-परिसङ्ख्याविधिश्चेति। तदुक्तम्-

"विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते।।"

**विषयः**

तत्र भवता धीमता यतिचक्रचूडामणिना अप्पयदीक्षितेन्द्रपादेन अद्वैतवेदान्तशास्त्रस्य सरिदिव प्रचाल्यमानानां नानाचार्याणां मतकुसुमानां सारसंग्रहात्मके विश्रुते सिद्धान्तलेशसंग्रहाख्ये ग्रन्थे प्रथमपरिच्छेदे 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यो निदिध्यासितव्यः[5]' इत्यादि जिज्ञासाधिकरणवेदान्तवाक्येषु श्रूयमानो विधिः कीदृशः इत्यादिविषये आदौ आलोच्यते। यतः अप्पयदीक्षितेन्द्रपादेनापि स्वयमेव विधिरसायणे अपूर्वविधि-नियमविधि-परिसङ्ख्याविधिः इति विधित्रयं विचार्यते तदपि अत्र सिद्धान्तलेशसंग्रहे अनुवर्तते। अतएव समादौ विधित्रयसन्दर्भे संक्षेपविचारः प्रस्तूयते।

**(१) अपूर्वविधिः**

आचार्यकुमारिलभट्टपादेन अपूर्वविधिलक्षणे एवमाह— 'विधिरत्यन्तमप्राप्तौ' नाम केनापि प्रमाणेन अज्ञातार्थबोधको विधिः अपूर्वविधिः। यथा-ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यादयः। ज्योतिष्टोमः स्वर्गसाधनमिति अनेनैव विधिना बोध्यते नान्येन प्रमाणेन इति अयमपूर्वविधिः। अस्य व्याख्यानं तन्त्रवार्तिके विचारितमस्ति[6]। अर्थसंग्रहकारेण श्रीमता लौगाक्षिभास्करपादेनापि अपूर्वविधेः लक्षणमुक्तम्—

"प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः'।

सिद्धान्तलेशसंग्रहकारेण तत्रभवता नानाशास्त्रनिष्णातेन आचार्याप्पयदीक्षितेन अद्वैतवेदान्तदर्शनस्य विश्रुते प्रकरणग्रन्थे सिद्धान्तलेशसंग्रहे अपूर्वविधिलक्षणे आह—

"तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिः अपूर्वविधिरिति"।

नाम अतीतवर्तमानभविष्यतीति त्रिषु कालेषु केनापि प्रमाणेन अप्राप्तविधिः अपूर्वविधिरिति। यथा-व्रीहिन् प्रोक्षति-इत्यादि विधायकशब्दप्रमाणं विना प्रोक्षणस्य संस्कारकर्मत्वं नावगम्यते इत्यत अयम् अपूर्वविधिरिति।

**(२) नियमविधिः**

पक्षे अप्राप्तांशपूरकः विधिः नियमविधिः। यथा— व्रीहिनवहन्ति इति।। नखविदलनादिपक्षे अप्राप्तस्य अवहननस्य विधानात् अयं नियमविधिः। अवहननविधानं न विधेः फलम्। अवहननस्य लोकसिद्धोपायान्तर्गतत्वात्। किन्तु अवघातेनैव इति

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

नियमविधेः फलम्। नियमस्य परं नियमापूर्वं प्रयोजनम्। अतश्च अप्राप्तांशपूरणमेव नियमविधौ वाक्यार्थः। अर्थसंग्रहकारेण लौगाक्षिभाष्करेण नियमविधेः लक्षणद्वयं व्याकारि [7]।

सिद्धान्तलेशसंग्रहकारेण तत्रभवता अप्पयदीक्षितेन्द्रेण सिद्धान्तलेशसंग्रहे नियमविधेः लक्षणं निरूप्याह—

'पक्षप्राप्तस्याप्राप्तांशपरिपूरणफलको विधिर्द्वितीयः'(नियमविधिः)।

यथा— व्रीहिनवहन्ति इत्यत्र आक्षेपादवहननप्राप्तिः तथा लोकावगतनखविदलनादीनामपि पक्षप्राप्तिः तदा अवहननरूपस्य अप्राप्तांशपरिपूरणफलको विधिः नियमविधिः। तदेवोच्यते सिद्धान्तलेशसंग्रहे।[8]

**(३) परिसङ्ख्याविधिः**

उभयोश्च युगपत्प्राप्तावितरनिवृत्तिपरो विधिः परिसंङ्ख्याविधिः[9]। यथा— 'पञ्च पञ्चनखा भक्ष्याः' इति पञ्चनखविशिष्टपञ्चप्राणिनां भक्षणस्य तदितरप्राणिनां भक्षणस्य (रागतः) युगवत्प्राप्तौ इतरनिवृत्तिपरः पञ्चातिरिक्तप्राणिनां भक्षणनिवृत्तिपरः विधिः परिसङ्ख्याविधिः। परिसङ्ख्या नाम वर्जनबुद्धिः। परिवर्जने[10] इति पाणिनीयसूत्रमस्ति। अतः परिसङ्ख्याविधिर्नाम निवृत्तिपरको विधिरिति। स च एवं व्याख्यायते— एकस्मिन् प्रधाने नियतप्राप्तस्य अङ्गद्वयस्य एकस्मिन् अङ्गे नियतप्राप्तस्य प्रधानद्वयसम्बन्धस्य अन्यतरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः इति वक्तव्यम्।

तन्त्रवार्तिके आचार्यकुमारिलभट्टपादेन परिसङ्ख्याविधिलक्षणे एवमाह—

'तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते'।

सिद्धान्तलेशसंग्रहकारेण परिसङ्ख्याविधेः लक्षणं एवं कृतमस्ति—

'द्वयोः शेषिणोरेकस्य शेषस्य वा एकस्मिञ्छेषिणि द्वयोः शेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्तिफलको विधिः परिसङ्ख्याविधिः'।

यथा- इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते[11]। इत्यग्निचयनप्रकरणे प्राप्तयोः अश्वरशनाग्रहणगर्दभरसनाग्रहणयोः अन्यतरस्य गर्दभरसनाग्रहणस्य निवृत्तिफलको विधिः परिसङ्ख्याविधिः।

**श्रवणादिषु विधिरस्तीति न वेति विषये भामती-विवरणप्रस्थानयोः मतभेदः**

बृहदारण्यकोपनिषदि मैत्रेयब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादि श्रुयते। तत्र खलु आत्मदर्शनस्य उपायभूते श्रूयमाणं श्रवणं विधीयते न वेति संशयः। विधिस्तु त्रिविधो वर्तते। अपूर्वविधि-नियमविधि-परिसंख्याविधिश्चेति।

विधिविचारात् प्राक् मैत्रेयब्राह्मणोक्तायां श्रुतौ श्रूयमाणस्य श्रवणमनननिदिध्यासनादीनां अङ्गाङ्गित्वविचारादनु विधिविचारः विधेयः। तत्र खलु श्रवणमनननिदिध्यासनादीनाम् अङ्गाङ्गित्वसन्दर्भे आचार्याणां मतभेदाः विद्यन्ते। भामतीकारस्य मतानुसारं श्रवणमननभ्यां पूर्वोपासनाजनितसंस्कारयुक्तेनान्तःकरणेनात्मसाक्षात्कारो भवति। आचार्यवाचस्पतिमिश्रः यद्यपि अन्तःकरणद्वारैवात्मसाक्षात्कारं प्रतिपादयति तथापि स निदिध्यासनात् सञ्जातः संस्कारः आत्मसाक्षात्कारे अन्तःकरणस्य सहायकः इति अङ्गीकरोति। एवञ्च श्रवणमनने निदिध्यासनस्योपकारके इति। अतएव आचार्यवाचस्पतेः मतानुगुणं निदिध्यासनमङ्गी तथा श्रवणमनने अङ्गभूते। तथाहि- नापि विद्योदयः तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्।

विवरणकारस्य मतानुसारं तु श्रवणस्य अङ्गित्वं विद्यते तथा मनननिदिध्यासनयोरङ्गत्वम्। तद्यथा-मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाङ्गी विधीयते। सर्वथा तावत् मनननिदिध्यासनाभ्यां साङ्गभूताभ्यां सह श्रवणविधानमस्त्येव। आचार्यवाचस्पतिमिश्रः निदिध्यासनस्याङ्गित्वं तथा श्रवणमननयोरङ्गत्वं निम्नलिखितप्रकारेण निरूपयति।

'न च विविदिषन्ति यज्ञेन' इत्यादिविरोधः, न ह्येषः विधिरपि तु वर्तमानोपदेशः। स च स्तुत्याप्युपद्यते। आचार्यवाचस्पतिमिश्रः ब्रह्मसाक्षात्कारे चतसृणां प्रतिपत्तीनां ब्रह्मणि अनुपपत्तिं प्रदर्शयति । अपि च चतस्रः प्रतिपत्तयो ब्रह्मणि एव। प्रथमा तावदुपनिषद्वाक्यश्रवणमात्राद्भवति, यां किलाचक्षते 'श्रवणमिति'। द्वितीया मीमांसासहिता

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

तस्मादेवोपनिषद्वाक्याभ्यामाचक्षते 'मननमिति'। तृतीया चिन्ता सन्ततिमयी यामाचक्षते 'निधिध्यासनमिति'। चतुर्थी साक्षात्कारवती वृत्तिरूपा, नान्तरीयकं हि तस्याः 'कैवल्यमिति'। तत्राद्ये तावत्प्रतिपत्ती विदितपदतदर्थस्य विदितवाक्यगतिगोचरन्यायस्य च पुंस उपपद्येते एवेति न तत्र कर्मापेक्षा। ते एव च चिन्तामयं तृतीयां प्रतिपत्तिं प्रसुवाते इति न तत्रापि कर्मापेक्षा । स चादरनैरन्तर्यदीर्घकालसेविता साक्षात्कारवतीमाधत्त एव प्रतिपत्तिं चतुर्थमिति न तत्राप्यस्ति कर्मापेक्षा तन्नान्तरीयकं च कैवल्यमिति न तस्यापि कर्मापेक्षा ।

तदेवं प्रमाणतः प्रमेयस्योत्पत्तौ च कार्ये च न ज्ञानस्य कर्मापेक्षेति बीजं शङ्कायाम्। एवं प्राप्ते उच्यते - उत्पत्तौ ज्ञानस्य कर्मापेक्षा विद्यते विविदिषोत्पादनद्वारा 'विविदिषन्ति यज्ञेनेति'[12] श्रुतेः। अत्रेषा शङ्का उदेति यत् श्रवणादीनां त्रयाणां समुदितानां ज्ञानसाधनत्वम्, एकैकेषां वा नाद्यः, तेषां युगपदनुष्ठानायोगात्। एकानुष्ठानकाले अपरस्य विनाशेन समुच्चयासम्भवात्। न द्वितीयः। एकेनैव ज्ञानोत्पत्तौ इतरयोः वैयर्थ्यप्रसङ्गादिति चेदुच्यते— तेषु त्रिविधेषु ज्ञानसाधनेषु निधिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणमङ्गी वा। श्रवणमनने तु तस्याङ्गे इति।

निदिध्यासनस्य साक्षात्कारत्वेन च 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्'[13], 'ततस्तु तं पश्यते निष्कलं ध्यायमानम्[14]' इत्यादिश्रुतिः प्रमाणम्। मनने श्रवणं हेतुः।

विवरणकारस्य प्रकाशत्मयतेर्मतानुसारमात्मसाक्षात्कारे श्रवणस्याङ्गित्वं भवति तथा मनननिदिध्यासनयोरङ्गत्वम्। तथाहि— 'मनननिधिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां श्रवणं नामाङ्गी विधीयते'[15]।

तत्र खलु श्रवणादिषु विधित्वमधिकृत्यैव आचार्यवाचस्पतिमिश्रसंस्थापिते भामतीप्रस्थाने तथा आचार्यपद्मपादप्रकाशात्मयतिभ्यां संस्थापिते विवरणप्रस्थाने च मतवैवध्यं दृश्यते।

**विवरणप्रस्थानानुगुणं श्रवणे नियमविधिपक्षविचारः**

विवरणानुयायिनस्तु 'श्रोतव्य' इति नियमविधिरेवेति वदन्त्युपपादयन्ति च। तथा हि वेदान्तश्रवणस्य तत्त्वसाक्षात्कारहेतुत्वं नाप्राप्तम्। यद् यद् अपरोक्षवस्तुविषयकं प्रमाणं तत्तत्साक्षात्कारहेतुः। वेदान्तश्रवणमपि साक्षात्कारप्रमाणम्। शब्दादप्यपरोक्षं ज्ञानं जायते, दशमस्त्वमसीत्यादौ तथानुभवात्। न च वेदान्तवाक्यश्रवणेन नित्यापरोक्षब्रह्मण आपाततो दर्शनरूपसाक्षात्कारसम्भवेऽपि अविद्यानिवर्तकब्रह्मसत्तानिश्चयरूपसाक्षात्काराभावात् तादृशसाक्षात्कारहेतुत्वमप्राप्तमिति वाच्यम्, विचारमात्रस्य विचार्यनिश्चयहेतुत्वस्य सामान्यतोऽवगतत्वात्। विचाररूपवेदान्त श्रवणस्यापि विचार्यब्रह्मसत्तानिर्णयरूपसाक्षात्कारस्य प्राप्तेः। अतः प्राप्तिसद्भावाद् नियमविधित्वम्। न चात्रान्वयव्यभिचारः श्रुतवेदान्तस्य शमदमादिसहकारिसाधनवैकल्यादेव तत्त्वसाक्षात्काराभावात्। नापि व्यतिरेकव्यभिचारः, वामदेवादेरपि जन्मान्तरीयसहकारिसहितवेदान्तश्रवणसम्भवात्। अतः वेदान्तश्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वप्राप्तौ नापूर्वविधिः।

अस्यापूर्वविधित्वाभाव एव "आवृत्तिरसकृदुपदेशादित्यधिकरणे" भाष्ये दर्शनपर्यवसानानि श्रवणादीनि आवर्त्तमानानि दृष्टार्थानि भवन्ति। यथा अवघातादीनि तण्डुलनिष्पत्यवसानान्यावर्तमानानीति भाष्यमपि सङ्गच्छते। अपूर्वविधित्वे तु सा आवृत्तिर्न युज्येत। सर्वौषधावघातवत्। सर्वौषधावघात उलूखलसंस्कारार्थत्वेनादृष्टार्थत्वात् सकृदेव क्रियते, न तु आवर्तत इति । अतोऽयं नियमः। नियमाभावे अहमिति मनसा गृह्यमाणे जीवे वेदान्तोपदेशाद् तस्यैव शुद्धबुद्धनिर्विशेषरूपत्वावगमे केवलनिपुणतरमनोव्यापारेऽपि प्रवृत्तः स्यात् न पुनर्वेदान्तश्रवणे इति वेदान्तश्रवणस्य पाक्षिकी प्रवृत्तिः स्यात्। तस्माद् अप्राप्तांशपरिपूरकोऽयं नियमविधिः। तथा च नियमविधित्वे तादृशमनोव्यापारस्य निवृत्तिः।

किञ्च नियमत्वाभावे गुरुमुखाधीनाध्ययनादिव चतुरस्य निपुणमतेः स्वप्रयत्नसाध्यवेदान्तश्रवणरूपविचारादपि तत्त्वसाक्षात्कारोदयः सम्भवतीति तन्निवृत्त्यर्थं गुरुमुखाधीनवेदान्तवाक्यश्रवणं नियम्यते, अन्यथा नियमजन्यादृष्टलाभो न स्यात्, तदभावाच्च तत्त्वसाक्षात्कारप्रतिबन्धककल्मषक्षयो न स्यात्। अतः स्वप्रयत्नरूपसाधनान्तरनिवृत्त्यर्थं नियमः।

ननु नियमविधित्वे सहकार्यन्तरविधिरित्यादिसूत्रस्थापूर्वविधित्वप्रतिपादकभाष्यविरोधः स्यादिति चेत्, न तत्रापूर्वविधित्वोक्तेर्नियमविधित्वाभिप्रायेणापि योज्यमानत्वात्। अत एव पक्षेणेति पाक्षिकाप्राप्तिकथनपरसूत्रपदयोजनेन तत्रैव

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

स्पष्टीकृतम्। अतः पाक्षिका प्राप्तिपरक एवापूर्वविधिः। एवं विवरणानुसारिणो वदन्ति।

केचिद् विवरणानुसारिणामेकदेशिनो वदन्ति। प्रथमं न शब्देनापरोक्षं ज्ञानं जायते शब्दमात्रस्य परोक्षज्ञानजननस्वाभाव्यात्। अपि तु स एव शब्दो यदा मननिदिध्यासनसहकारिसाधनसम्पन्नो भवति तदा साक्षात्कारहेतुः। यथा विधुराणां क्लृप्तकामिनीभावनाप्रचयसाहित्याद् शब्दस्यापि अपरोक्षज्ञानजनकत्वं दृष्टम्। तथा प्रकृतेऽपि शब्दस्य भावनाप्रचयवशाद् विधुरान्तःकरणवदपरोक्षज्ञानजनकत्वं प्राप्तमिति नियमविधित्वम्।

केचित्तु वेदान्तश्रवणेन न ब्रह्मसाक्षात्कारः शब्दस्य, परोक्षज्ञान जननस्वाभाव्यात्, अपि तु मनसैव। मनसैवानुद्रष्टव्यमिति श्रुतेः। अत एव गीताभाष्ये भगवत्पादैरभिहितम्— शास्त्राचार्योपदेशशमादिसंस्कृतं मनः आत्मदर्शने कारणमिति। अतः श्रवणं निर्विचिकित्सपरोक्षज्ञानार्थमिति निर्विचिकित्सशाब्दपरोक्षज्ञानार्थत्वेनैव नियमविधिः। शब्देन परोक्षज्ञानं तु लोकत एव प्राप्तमिति वेदान्त श्रवणविधिः शाब्दज्ञाने विचिकित्सानिवृत्त्यर्थम्। एतन्मते ब्रह्मसाक्षात्कारहेतुमनः सहकारितयैव मननिदिध्यासनयोर्विधिः। पूर्वमते तु शब्द एव मननिदिध्यासनसहकारिसमवधानात् साक्षात्कारहेतुरिति मननिदिध्यासनयोः साक्षात्कारहेतुशब्दसहकारितयैव विधिः। श्रवणं तु पूर्वमते इव निर्विचिकित्सपरोक्षज्ञानार्थमेव विधीयते।

**भामतीप्रस्थानानुसारं श्रवणादिषु अविधित्वपक्षः**

भामतीप्रस्थानानुयायिनः एवं कथयन्ति-आत्मा श्रोतव्य इत्यत्र नास्ति कोऽपि विधिः। श्रवणस्य मननादिवत् ज्ञानरूपत्वात्। आत्मविषयकत्वेन निबध्यमानं श्रवणमागमाचार्योपदेशजन्यमात्मज्ञानमेव, न विचाररूपम्। ज्ञानस्य वस्तुतन्त्रत्वात् पुरुषतन्त्रत्वाभावात् विधातुमशक्यम् एव।

'तत्तु समन्वयात्'[16] इति समन्वयाधिकरणभाष्ये आचार्यवाचस्पतिमिश्रेणोच्यते-आत्मेत्येवोपासितेति न विधिः, अपि तु विधिसरूपः अयमिति। अन्यतः प्राप्त एव हि श्रवणादयः विधिसरूपवाक्यैरनूद्यते[17]।

समन्वयसूत्रे कल्पतरावपि तेषां ज्ञानरूपत्वमुक्तम्। तथा हि— "श्रवणं हि ब्रह्मात्मनि तत्त्वमसि वाक्यस्य तच्छब्दश्रुत्यादिपर्यालोचनया तात्पर्यावगमः। अस्य च विषयविशेषावच्छिन्नप्रत्ययस्यानवगमे तत्कर्तव्यत्वबोधायोगात्। अवगमे च श्रवणस्यैव जातत्वात् पुनः कर्तुमकर्तुमन्यथा वा कर्तुमशक्यत्वात्। एवं मननस्यापि विषयविशेषनियतयुक्त्यालोचनस्यावगतस्य कर्तुमशयत्वात्। उपासनस्यापि यथा श्रवणमननं प्रत्ययावृत्तेरवगमे द्वित्रिवारावृत्तेरवश्यंभावाद् विधित्सितार्थस्य ज्ञातस्य न पुनः कर्त्तव्यत्वम्, दर्शनस्य त्वशक्यत्वं स्फुटमिति"[18] अनेनोदाहृतेन ग्रन्थेन श्रवणादीनां ज्ञानरूपत्वाद् न विधित्वमिति स्पष्टीभवति । अतः मननादिवदिति कथनं युक्तमेव।

ननु वेदान्ततात्पर्यविचाररूपं श्रवणमिति पक्षे नियमे सम्भवति ज्ञानरूपत्वं तस्याङ्गीकृत्य विधित्वाभावो न युक्तमिति चेत्, न श्रवणस्य तात्पर्यविचाररूपत्वे तात्पर्यनिर्णयद्वारा भ्रमसंशयरूपप्रतिबन्धकनिरासस्यैव फलत्वौचित्याद् न त्वन्यप्रतिबन्धकनिरासस्य। सन्ति हि पापादयः प्रतिबन्धकाः। न वा ब्रह्मावगम एव फलं भवतुमर्हति। यदर्थं विचारः तदर्थस्यैव फलत्वात्। एवं तात्पर्यविचारस्य निर्णयद्वारा तात्पर्यभ्रमादिनिवृत्तिः लोकत एव प्राप्तेति न तत्र विधेः कस्यचिदप्यवकाशः।

ननु विचारस्य नियमविधित्वे गुर्वधीनता सेत्स्यति। विधित्वाभावे च स्वतन्त्रस्यापि विचारस्य प्रसङ्ग इति चेत् न। "तद् विज्ञानार्थं गुरुमुपसरेदित्यादिगुरूपसदनविधिनैव गुर्वधीनविचारस्य सम्भवात् तदर्थं न विध्यन्तरापेक्षा"। विज्ञानार्थं विधीयमानं गुरूपसदनं तदधीनवेदान्तविचारद्वारैव पर्यवस्यति। तेन स्वतन्त्रसाध्यविचारविनिवृत्तिः।

ननु विज्ञानार्थं विधीयमानं गुरूपसदनं वेदान्तविचारद्वारैव विज्ञानाय प्रभवति यथा तथैव तद् अध्ययनद्वारापि प्रभवेद् तथा चाध्ययनविध्यभावप्रसङ्ग इति चेत्, न विद्यार्थगुरूपसदनाध्ययनार्थगुरूपसदनयोर्विशेषात्। विज्ञानार्थगुरूपसदनं नाक्षरावाप्त्यर्थं विधीयतेऽपि तु विज्ञानार्थम्। अध्ययनविधिस्तु अक्षरावाप्त्यर्थम्। अतः विज्ञानार्थं गुरूपसदनविधिः विचारमेव द्वारीकरोति, न त्वध्यायनमिति। तदर्थं लिखितपाठादिव्यावृत्त्यर्थमध्ययनविधिः सफलः। गुरुमुखोच्चारणानुच्चारणमध्ययनम्। 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधिः।

न च वेदान्तविचारार्थिनः कस्यचिद् द्वैतशास्त्रेऽपि तात्पर्यभ्रमादिनिरासाय प्रवृत्तिः स्यात्। तत्रापि तदभिमतयोजनया

वेदान्तविचारसत्त्वाद् तत्र प्रवृतिनिवृत्तये अद्वैतात्मपरवेदान्तविचारस्य नियमत्वमङ्गीकर्त्तव्यमेवेति वाच्यम्। स्वयमेव द्वैतशास्त्रस्य तात्पर्यं भ्रमहेतुभूतस्य तात्पर्यभ्रमनिरासकत्वासम्भवात्। नहि यदेव भ्रमवारणं तदेव तन्निरासवारणं भवति। न च द्वैतशास्त्रे वस्तुतः तात्पर्यभ्रम- निरासकत्वाभावेऽपि तन्निरासकत्वभ्रमादेव द्वैतशास्त्रे प्रवृत्तिः स्यात्, तन्निवृत्त्यर्थं नियम इति वाच्यम्, ईश्वरानुग्रहफलाद्वैत श्रद्धासहितस्य तादृशभ्रमासम्भवात्। तद्रहितस्य श्रोतव्यवाक्ये पराभिमतयोजनया द्वैतात्मविचारविधिपरत्वभ्रमसम्भवाद्। तादृशभ्रमस्य च विधिशतेनाप्यपरिहार्यत्वात्। न च भाषाप्रबन्धादिनिवृत्यर्थो नियमः, अध्ययनविधिनैव तन्निवृत्तेः।

मननिदिध्यासनयोः अपि विधित्वं खण्डयन् आचार्यवाचस्पतिमिश्रः निगदति मननिधिध्यासनयोरपि न विधिः तयोः अन्वयव्यतिरकसिद्धसाक्षात्कारयाः विधिसरूपवचनैरनुवादात्। अतः ब्रह्मसाक्षात्काराय विधेः आवश्यकता नास्ति। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यश्च" इति श्रुतिवाक्ये वस्तुतः विधिर्नास्तीति तत्त्वमसीक्षायामपि उपपादितम् विस्तरेण।

तद्यथा 'न च चिन्तासाक्षात्कारयोः विधिरिति' तत्त्वसमीक्षायामस्माभिरूपपादितम्। विस्तरेण च अयमर्थस्तत्रैव प्रपंचितः। 'जर्तिलयवाग्वा जहुयात्' इतिवद् विधिसरूपा एते 'आत्मा वा अरे द्रष्टव्यः' इत्यादयो न तु विधय इति"।

प्रकटार्थविवरणकारप्रमुखाः केचिदाचार्याः एनमाक्षेपं कुर्वन्ति यत् आचार्यवाचस्पतिमिश्रः सहकार्यन्तरविद्याधिकरणे "अपूर्वत्वाद्विधिरास्तेयः" इत्यनेन वाक्येन श्रवणादावपूर्वविधिं स्वीकरोति। अपरत्र "सहकारित्वेन च[19]" इत्यस्य सूत्रस्य भामत्यां "द्रष्टव्यो निदिध्यासितव्यः" इति च विधिसरूपं न विधिः इति कथयति। अतः आचार्यवाचस्पतेः कथनेषु पूर्वापरव्याहृतभाषिता अस्तीति। अस्याक्षेपस्य समाधानममलानन्देन तथा आचार्याप्पयदीक्षितेन सम्यग्रूपेण कृतम्। आचार्यः अमलानन्दः व्यक्ति—

"नात्र अपूर्वविधिः प्राप्तेरनन्योपायता न च।
नियमः परिसंख्या वा श्रवणादिषु सम्भवेत्"[20]॥

अर्थात् ब्रह्मसाक्षात्कारं प्रति श्रवणादिष्वपूर्वविधिः नियमविधिः परिसंख्याविधिर्वा नास्ति। यतः श्रवणादिभिः भिन्नः कश्चिदन्योपायः एव तत्र सम्भवः नास्ति।

परिमलकारः आचार्यः अप्पयदीक्षितोऽपि प्रकटार्थविवरणकारस्य मतं खण्डयन् कथयति "सो पदतत्भाष्ययोः भेददर्शनव्यासङ्गात् ध्यानेऽनुत्सहमानस्य उत्साहजननार्थम् विधिसरूपोऽयमर्थवाद इत्यत्रेव तात्पर्यमिति भावः। विध्यभावपक्षमेव सिद्धान्तमवलम्ब्य तमुपपादयति"[21]।

उपसंहारः-

उपर्युक्तप्रकारेण आचार्यः वाचस्पतिमिश्रः श्रवणादौ कमपि विधिं न स्वीकरोति।किन्तु विवरणकार: नियमविधिमङ्गीकरोति। तद्यथा "तण्डुलनिष्पत्तिः फलतया दुष्टफले अप्यवघाते व्रीहीनवहन्ति इति यथा नियमविधिः तथा इह श्रोतव्य इति विधिः किं न स्यात्"[22]।

अस्मिन् सन्दर्भे वार्तिककारस्य सुरेश्वराचार्यस्य मतमिदमस्ति यत् श्रवणादौ परिसंख्याविधिरस्तीति यथोक्तम् अप्पयदीक्षितेन सिद्धान्तलेशसंग्रहे—

"नियमः परिसंख्या वा विध्यर्थोऽत्र भवेद्यथा।
अनात्मा दर्शनेनैव परमात्मानमुपास्महे"॥

## Endnotes

1. अर्थसंग्रहः
2. मीमांसान्यायप्रकाशः
3. अर्थसंग्रहः

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

4. मीमांसापरिभाषा
5. बृ.उ 2.4.5
6. अप्राप्तप्रापकत्वञ्च प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वं प्रमाणान्तरजन्यप्रतीत्यविषयविषयकप्रतीतिजनकत्वं वा।(तं.वा)
7. क. नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः।(अ.सं) ख. पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः। (अ.सं)
8. अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेवावहननप्राप्तिर्भविष्यतीति न तत्प्राप्त्यर्थोऽयं विधिः, किन्त्वाक्षेपादवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वाविशेषात् नखविदलनादिरपि पक्षे प्राप्नुयादिति अवहननाप्राप्तांशस्य सम्भवात् तदंशपरिरणफलकः।
9. अर्थसंग्रहः
10. पा.सू- 8.1.5
11. तै.सं 4.1.2
12. बृ.उ-4.5.6
13. श्वे.उ-1.3
14. मु.उ-3.1.8
15. भामती-1.1.4
16. ब्र.सू-1.1.4
17. भामती-1.1.4 पृ-153
18. कल्पतरु: १७ १-१-४
19. ब्र.सू-3.4.33
20. वेदान्तकल्पतरुः-पृ-920
21. विवरणतात्पर्यदीपिका, पृ-34
22. सिद्धान्तलेशसंग्रहः

## Bibliography


- द्विवेदी , पारसनाथ. सिद्धान्तलेशसंग्रहः. सम्पूर्णानन्दसंस्कृविश्वविद्यालयः, वाराणसी, 2005.
- शास्त्री , ब्रह्मश्री एस् आर् कृष्णमूर्ति. शास्त्रसिद्धान्तलेशसंग्रहः . श्रीमदप्पयदीक्षितेन्द्रग्रन्थावलिप्रकाशनसमितिः, सिकन्दरबाद्, 1973.
- आचार्य , जानकीशरण. वेदान्तपरिभाषा. श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम(गुजरात), 2019.
- मूर्ति , एम् एल् नरसिंहः. शाङ्करदर्शनमर्मप्रकाशः. राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपति, 1996.
- तैलङ्ग , रामशास्त्री. विवरणप्रमेयसंग्रहः. किशोरविद्यानिकेतन, वाराणसी, 1990.
- वझे , भाउशास्त्री. संक्षेपशारीरकम्. चौखम्बा प्रकाशन, वारणसी, 2007.
- Metha , N.D. Vedanta Sidhanta Bheda. A.D.Publication, Delhi, 1985
- Jha ,V.N. Bhamati and Vivarana School of Advaita Vedanta. Motilal Banarsidass Publishers Private Limited, Delhi,2010